काले संततवर्षिणो जलमुचः सस्यैसमृद्धा धरा
भूपाला निजधर्मपालनपरा विप्रास्त्रयीनिर्भरा

स्वादुक्षीरनतोधसः प्रतिदिनं गावो निरस्तापदः
संतः शांतिपरा भवंतु कृतिनः सौजन्यभाजो जनाः

इति निष्क्रांताः सर्वे द्वितीयसंधिः इति श्रीकविशेखराचार्यश्रीज्योतिरीश्वरविरचितं धूर्त्तसमागमाभिधं प्रहसनं समाप्तं श्रीहरिः संवत् १९४० फाल्गुण कृष्ण ३० भौमवासरे श्रीहरिः श्री श्री

References.— 1 Mss—Aufrecht Catalogus Catalogorum, i 272[b]; ii 59[a].

For details cf. A. S. B. Des. Cat. Vol. VII No. 5341.

नटकमेलन Naṭakamelana

No. 88 408. / 1887-91.

Size.— 9 in. by 3⅓ in.

Extent.— 20 leaves; 7 lines to a page; 32 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear and legible but not uniform; portion on many folios scratched out; borders ruled in triple black lines; edges of folios damaged; fol. 1 missing; red pigment used.

Another name for this work is लटकमेलन.

Age.— Saṁvat 1608.

Author.— Śaṅkhadhara.

Subject.— A Prahasana enacted before Govindadeva.

Begins.— (abruptly) fol. 2[a]

मंडलिकाधिराजः । कविप्रियो नाटकनर्तनार्थमादेशयन्मां रणरंगमल्लः ॥ यदद्य वसन्तसमयसमुचितेन कविराजश्रीशंखधरविरचितेन नटकमेलनाम्ना प्रहसनेनास्मान्विनोदयेति । etc.

fol. 13[a] लज्जाविक्रयो नाम प्रथमोंकः ॥ छ ॥

Ends.— fol. 21ᵃ

भूदेवास्स्तिवाचास्तिरयतु दुरितं नीरुजः सन्तु संतः ।
सन्तु प्रौढारिवीरव्रजतिलककलाशालिनः क्षोणिपालाः ।
आस्तां विद्वत्प्रकाण्डश्रवणपुटचमत्कारिकाव्यं कवीना-
मस्तु व्यामोहशान्तिः सृजतु हृदि मुदं निश्चलां चंद्रचूडः ॥ छ ॥

इति निष्क्रान्ताः सर्वे ॥ दन्तुरापरिणयननाम द्वितीयोंकः ॥ समाप्तमिदं नटमेलकं नाम नाटकं ॥ शुभमस्तु ॥ श्रीरामचंद्राय नमः ॥ संवत् १६०८ पौषि मासि १२. . । गोपालेन लिख्यापितं । कृष्णदासेनालेखि ॥

References.— Mss Aufrecht's Catalogus Catalogorum i, 542ᵃ; ii, 128ᵃ; iii, 115ᵃ.

Cf. Mad. Des. Cat. Vol. XXI No. 12642 and A. S. B. Cat. Vol. VII No. 5334.

Printed in Kāvyamālā 20, 1889.

नटकमेलकप्रहसन Naṭakamelakaprahasana

No. 89 — 21. / 1872–73.

Size.— 10⅘ in. by 4⅘ in.

Extent.— 12 leaves; 8-9 lines to a page; 38 letters to a line.

Description.— Country paper; Devanāgarī characters with पृष्ठमात्राs; hand-writing clear, legible and uniform; borders ruled in triple black lines; red pigment used; white chalk used for corrections; marginal notes; right-hand edges worn out and moth-eaten; complete.

Age.— Appears to be old.

Author.— Śaṅkhadhara.

Begins— fol. 1ᵃ

॥ ॐ नमः श्रीगणेशाय नमः ॥

गौरीचुंबनचंचलं चलचलच्चंद्रप्रभामंडलं
व्यावल्गत्फणिकुंडलं रतिरसप्रस्विन्नगंडस्थलं ।

प्रौढप्रेमपरै परापरिचयप्रोत्फुल्लनेत्रांचलं ।
शंभोरस्तु विभूतये त्रिजगतामुन्मत्तमंगं शिरः । २

... ...

नांयते सूत्रधारः अलमतिविस्तरेण ॥ यतः
गोविंददेवः प्रथितः पृथिव्यां श्रीमन्महामंडलिकाधिराजः ॥
कविप्रियो नाटकनर्त्तनार्थमादेशयन्मां रणरंगमल्लः ॥ ४

यदद्य वसंतसमयसमुचितेन महाकविराजश्रीमन्महामतिशंखधरविरचितेन लटकमेलकनाम्ना प्रहसनेनास्मान्विनोदयेति । etc.

Ends.— fol. 21[a]

चुंबंतः सरसीमुखांबुजवनं पांथ प्रमोथच्छिदः
प्रोन्मीलन्नवमल्लिकामुरभयः श्रीखंडसंबंधिनः
संभोगाश्रमवैरिणः स्मरशरव्यापारविस्तारिणः
कार्णाटीभुजवल्लिबंधविकलाः सर्पंति मंदानिलाः

अपि च

भूदेव स्वस्ति वाचास्तिरयतु दुरितं निर्जराः संतु संतः
संतु प्रौढारिवीरवृजविजयकलाशालिनः क्षोणिपालाः ।
आस्तां विद्वच्चकोरश्रवणपुटचमत्कारिकाव्यं कवीना-
मस्तु व्यामोहशांतिः सृजसुहृदि मुदं निश्चलां चंद्रचूडः । ४१

इति निष्क्रांता सर्व्वे ॥ इति कविशंष(ख)धरविरचितं नाटकं संपूर्णं ॥
॥ श्रीकल्याणमस्तु ॥ छ ॥

References.— See No. 88.

नरकासुरवधव्यायोग Narakāsuravadhavyāyoga

No. 90 **624. / 1882–83.**

Size.— $9\frac{7}{8}$ in. by $4\frac{1}{2}$ in.

Extent.— 11 leaves; 11 lines to a page; 35 letters to a line.

Description.— Country paper; Devanāgarī characters; not very old in appearance; hand-writing bold and clear but not uniform; borders ruled in double black lines; incomplete.

Age.— Not very old.

Author.— Dharma, son of Parvateśvara.

Subject.— Fight between Kṛṣṇa and the demon Narakāsura.

Begins.— fol. 1[b]

॥ श्रीगणेशाय नमः ॥
कस्तूरीपरिदिग्धमुग्धकमलावक्षोयबुध्या दृढं
नीलाद्रेः शिखरेषु नित्यकुतुकीदैत्यारिरव्यात्स नः ॥
प्रत्यंगाभरणेषु दीप्तवपुषो सेवासुदेवास्फुटं
यस्याशेषसुरात्मतां विदधते चंद्रार्द्धचूडादयः ॥ १ ॥
... ...
... ...
विख्याते जनि पर्वतेश्वरसुधीः क्रीडारुणस्यान्वये
षण्णां दर्शनकारिणां सुमनसामेकात्मलीलायितं ।
धर्माख्येन मनीषिणा विरचितस्तत्सूनुना तादृश-
व्यो(व्या)योगोरसजृंभितोस्ति नरकध्वंसाभिधो नूतनः ॥१३॥ etc.

Ends.— fol. 11[b]

ना० ॥ मुग्धे मा भैषीः ॥ तान्यखंडयदखंडचंडिमापंडितः स युधि कांडमंडलैः ॥ ५९ ॥ पु. ॥ ततः २ ॥ ना० ॥ तदनु ॥ हरिणांकांबुबपरिणामबंधुरं प्रहितं प्रदीप्तिपिहितं सुदर्शनं ॥ तरसा जहार शिरसामरे मृशं

References.— Aufrecht's Catalogus Catalogorum, i 277[a]; ii, 60[a]; iii, 59[b].

For described Ms. see I. O. Cat. No. 4185.

नरकासुरविजय Narakāsuravijaya

No. 91 441. / 1884-87.

Size.— $8\frac{4}{5}$ in. by $3\frac{4}{5}$ in.

Extent.— 30 leaves; 7 lines to a page; 30 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear, legible and uniform;

borders and edges ruled with red, and yellow lines ; yellow pigment used for corrections ; fly leaf decorated with beautiful designs.

Age.— The Ms appears to be old.

Author.— Dharmasūri.

Subject.— A Vyāyoga.

Begins.—fol.

॥ श्रीगणेशाय नमः ॥ श्रीवागीश्वर्यै नमः ॥ श्रीगोपालकृष्णो विजयतेतराम्

जयति जयति देवो देवकीनंदनोयं
जयति जयति कृष्णो वृष्णिवंशप्रदीपः ॥
जयति जयति मेघश्यामलः कोमलांगो
जयति जयति पृथ्वीभारनाशो मुकुंदः ॥ १ ॥

श्रीराधारमणो विजयतेतराम् ॥

fol. 1[a] ओं नमो भगवते वासुदेवाय ॥
कस्तूरीपरिदिग्धमुग्धकमला etc. as in No. 90.

Ends.-- fol. 29[b]

,, 30 -

कृष्णः ॥ किं ते भूयः प्रियमुपकरोमि ॥
पुरंदरः ॥ इतःपरं किमुपकर्त्तव्यं ॥

दुर्वारासमरे मुरेण सहिता सर्वापि रक्षश्चमू—
र्गर्वांधो गलितश्च सोपि नरकः पूर्वामराणां प्रभुः ॥
निर्वाणं गमितश्च शोकदहनो गीर्वाणमातुस्ततो
सर्वाण्यस्मदपेक्षितानि भगवन्निर्वाहितानि त्वया ॥ ८३ ॥

तथाप्येतदस्तु भरतवाक्यं ॥

मामत्युल्लसिताः रता विवरणे तंत्रे निरूढिं गता
संचिंतामणयः समुज्वलयशो लीलावतीवल्लभः ॥
सांख्यान्यायविचारचुंचुमतयः प्राभाकरप्राक्रिया
—धौरेयस्फुरणा भवंतु सततं विप्राश्च नित्योच्छवाः ॥ ६४ ॥
आबिभ्रताश्रियमुरस्यथवा शिरोधा--
वज्जं च नाभिसुषिरे यदि वा कपर्दे ॥
पाणौ सुदर्शनवताप्यथवा ललाटे
देवेन केनचिदिदं जगदेतु मोदं ८५

इति श्रीवारणास्यन्वयसंभूतसुधाकरश्रीधर्मसूरिविरचितो नरकासुरविजयो नाम व्यायोगः ॥ ॥ श्रीगोपालकृष्णार्पणमस्तु ॥

श्रीरस्तु मंगलं जगतः

भाग्याभिधाननगरे वासुदेवेन शास्त्रिणा ॥
लिखितो नरकध्वंसव्यायोगोंधस्य पुस्तकात् ॥ १ ॥
श्रमेण बालकृष्णस्य पठनार्थमयं मुदा ॥
वृषाब्दे श्रावणे कृष्णद्वादश्यां भृगुवासरे ॥ २ ॥
अद्वैतवादी कुचमंडलस्ते मध्यश्चकोराक्षि च शून्यवादी
तयोर्विवादं परिहर्त्तकामा श्रुत्यंचलं पश्यति दृष्टिरेषा ॥ १ ॥

References.— Same as in No. 90.

नागानन्द Nāgānanda

No. 92 455. / 1899-1915.

Size.— $11\frac{1}{3}$ in. by $5\frac{1}{3}$ in.

Extent.— 37 leaves; 11 lines to a page; 42 letters to a line.

Description.— Country paper; Devanāgarī characters; not very old in appearance; hand-writing very beautiful, clear, legible and uniform; red pigment occasionally used; complete. The Ms belonged to one Paraśurāma Godbole and was copied by one Haripanta for him at Poona in Śaka 1783.

Age.— Śaka 1783.

Author.— Śrī Harṣa.

Subject.— A drama describing the story of Jīmutavāhana.

Begins.-- fol. 1[b].

श्रीकृष्णाय नमः ॥

ध्यानव्याजमुपेत्य चिंतयसि कांमुन्मील्य चक्षुः क्षणं
पश्यामंगशरातुरं जनमिमं त्राताऽपि नो रक्षसि ॥

मिथ्याकारुणिकोसि निर्घृणतरस्त्वत्तः कुतोऽन्यः पुमान्
त्सेर्ष्यं वारवधूभिरत्याभिहितो बुद्धो जिनः पातु वः ॥ १ ॥

... ...

नांयंते सूत्रधारः ॥ अथाहमिंद्रोत्सवे सबहुमानमा(हूय)कार्यनानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य राजर्षेः पादपद्मोपजीविना राणसमूहनोक्तः ॥ यथा ॥ यदस्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तु रचनाऽलंकृतं विद्याधरजातके प्रतिनिबद्धं नागानंदनाम नाटकं कृतमित्यस्माभिः श्रोत्रपरंपरया श्रुतं न च प्रयोगतो दृष्टं तत्तस्यैव राज्ञो बहुमानादस्माभुवाऽनुग्रहबुध्या यथा प्रयोगेण त्वया नाटयितव्यमिति ॥ etc.

fol. 7[b] इति श्रीहर्षकृतस्य नागानंदनाटकस्प प्रथमोंकः ॥ १ ॥

fol. 15[b] इति श्रीहर्षकृतौ नागानंदनाटके गांधर्वविवाहे जीमूतवाहनपरिणयो नाम द्वितियोंकः समाप्तः ॥ २ ॥

fol. 22[a] इति ... ... तृतीयोंकः समाप्तः ॥ ३ ॥

fol. 28[a] इति ... ... चतुर्थोंकः समाप्तः ॥ ४ ॥

Ends— fol. 36[b]

तथापीदमस्तु भरतवाक्यं
वृष्टिं हृष्टशिखंडितांडवकृतो मुंचंतु कालांऽबुदाः
कुर्वंतु प्रतिरूढसंततहरित्सोमोत्तरीयां क्षितिं
चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसै--
र्मोदंतां सततं च बांधवसुहृद्गोष्ठी प्रमोदाः प्रजाः ४०

इति निष्क्रांताः सर्वे ॥ इति श्रीहर्षकृतौ नागानंदनाटको जीमूतवाहन-जीवनो नाम पंचमोंकः ॥ ५ ॥ श्रीगोपालकृष्णार्पणमस्तु ॥ श्रीहरये नमः ॥ ५ ॥

References.— 1 Mss—Aufrecht's Catalogus Catalogorum i, 283; ii, 61[b]; iii, 61[a].

Descriptive Catalogues Mad. Des Cat. Vol. XXI, Nos. 12532–4; I. O. Cat. No. 4161.

A. B. Keith: Sanskrit Drama, p. 174–5.

2 Printed Editions– 1 Ed. Calcutta 1886; 2 ed. by M. R. Kale; 3 ed. by R. D. Karmarkar; 4 by Bergaigne, French translation; 5 trans. by P. Boyd, London 1872 etc.

पञ्चायुधप्रपञ्चभाण Pañcāyudhaprapañcabhāṇa

No. 93 191. / 1879-80.

Size.-- 12½ in. by 5¼ in.

Extent.-- 42 leaves ; 10-12 lines to a page ; 25-30 letters to a line.

Description.— Modern bluish paper with water-marks ; Devanāgarī characters ; hand-writing, bold but careless and not uniform ; folios 11-14 missing ; incomplete.

Age.— A modern copy.

Author.— Not mentioned (ascribed to Trivikrama).

Begins.— fol. 1[b]

पंचायुधप्रपंचभाणीयं नाम्नाख्य(ख्या)तोस्तिचाँपेयतरुः

आताम्रे नयने स्फुरत्कुचभरश्वासो न विश्राम्यति

स्वेदांभःकणदंतुरं तव मुखं हेतुस्तु नो लक्ष्यते ॥

धिक्कोवेदमनः स्त्रिया इति गिरारुष्टा प्रियां भीषयं—

स्तस्यास्तत्क्षणकातरेक्षणपरिस्पृष्टो हरिः पातु वः ॥ १ ॥

विलिख्य सत्याकुचकुंभसीम्नि पत्रावलिन्यासमिषेण राधां ॥

लीलारविंदेन तथा सरोषं पायाद्विटः कोप्यभिहन्यमानः ॥ २ ॥

नांयंते सूत्रधारः ॥ etc.

Ends.-- abruptly fol. 46[a]

अयि कमनज्योत्स्ने कदात्रागतासि । त्रिभिरप्यस्माभिर्न लक्षिता ॥ अनाकर्णितकेन[1] किं ब्र० विजयतामुत्कोशलेशविधुरः ॥

कंदर्पविलासः ॥ उपेक्षारसनापीतरक्तकांतासु मारुते ॥

भुजंगशब्दो रसिकेनूनमेवार्थ वास्त्वयि ॥ ६१ ॥

सहर्षौत्सुक्यं ॥ अयि कमनज्योत्स्ने मदुपालंभगर्भोपितावकवचनसंदर्भोयमनुरक्तकांतागमशुपिरोमे समास्वाद्यतापदमधिरोहति मत्स्यंडिका

References.— Aufrecht's Catalogus Catalogorum i, 317[b] ; ii 70[a], 209[a].

पार्थपराक्रम Pārthaparākrama

No. 94 20. / 1872-73.

Size.— 10 in. 4 in.

Extent.— 12(24) leaves ; 12 lines to a page ; 40 letters to a line.

Description.— Country paper ; Devanāgarī characters with पृष्ठमात्राs; old and discoloured ; hand-writing closely written but legible and uniform ; the Ms contains very thin folios which are pasted on other thick folios ; square blanks in the centre ; borders ruled in triple black pencil lines ; corrections recorded with pencil in margins ; the Ms is very incorrect.

This Ms is a tracing of a Ms in the Bhaṇḍāra of the Līmbdi's Pādā (Cf. Introduction to Pārthaparākrama, ed. in the Gaikwad Oriental Series, No. IV. p. vi.).

Age.— Saṁvat 1426.

Author.— Pralhādanadeva Paramāra. (For details see G. O. S. Vol. IV. Introduction).

Subject.— The valour of Arjuna in recovering the cows from the Kauravas for the King of Vīrāṭa.

Begins.— fol. 1

॥ ६० ॥ अर्हं ।

देवः स वः शिवशतानि तनोतु शौरि-
र्यः शैशवेऽपि तुलयन्नतुलं नगेंद्रं ।
लज्जां विजित्य परिभूय भियं गुरूणां ।
गोपीगणैः सरभसं परिरभ्यते स्म । ५

नांयते स्थापकः ।

तन्न जाने भगवतः श्रीमदचलेश्वरदेवस्य पवित्रीकारोपणपर्वाणि केनापि रूपकेणाद्य प्रमोदनीयाः सभासदः । इति चिंतां नाटयति ।

प्रविश्य पटक्षेपेण नटः

नटः आर्य तदेतदतुलपराक्रमचमत्कारितासिलभारते वर्षस्य श्रीधारावर्षस्य पर्षदा प्रहितं प्रबंधं तन्निरूपयतु भवान् । सूत्रधारः । गृहीत्वा वाचयति ।

यत्र क्षत्रनिकारकारणरणप्रेमा कुमारः प्रभुः
सदर्भः सुकवेः समाधिसमतागर्भः कुमारस्य च ।
तत्रास्माकमकुंठिताद्भुतरसश्रोतः प्लुते रूपके
चेतः कौतुकलोलुपं सपदि तत्संपाद्यतामुद्यमः ॥
एतेन व्यायोगप्रयोगेनियोगः सामाजिकानां इति तर्कयामि । स हि
दीप्तरसतरंगितो राजव्यतिरक्तनायकोपेतश्च ।
नटः स्मृत्वा भाव । अस्थैव **युवराजप्रल्हादन**निर्मित**पार्थपराक्रम**-
नामा व्यायोगः ।

सूत्रः सानंदं । अहो प्राचीनपुण्यसंपदां संप्रदायः ।
तथा हि । प्रल्हादनस्य कविता वसतिः प्रसत्तेः
संतोषकारि चरितं कपिकेतनस्य ।
निर्मत्सरा च परिषत् पटुरस्मि नाट्ये
तत्सर्वथा फलितमद्य मनोरथैर्नः ॥ ५ etc.

Ends.-- fol. 24

वासवः— वत्स सात्विकशिरोमणे युधिष्ठिर वीरोत्तंस सव्यसाचिन् । तथापीदमस्तु ।

अब्भैरस्तु निरंतरा वसुमती तत्संपदं वारिदाः ।
काले कंदलयंतु भेकनिकरप्राणप्रदैरंशुभिः ।
तत्संतामतिदानमग्निषु वषट् कुर्वंतु हव्यं द्विज- ।
स्तद्रक्षा सुविचक्षणाः क्षितिभुजो राज्यं भजंतु स्थिरं ॥ ६१

इति निष्क्रांताःसर्वे समाप्तोयं **पार्थपराक्रम**नामा **व्यायोगः** ॥ छ ॥
ग्रं. ४३२ ॥ छ ॥

शुभं भवतु ॥ छ ॥
श्रीविक्रमाद्दतुविलोचनवेदचंद्र
वर्षे नभस्यविशदे प्रतिपद्दिने व (च)
व्यायोगमेतमिति **पार्थपराक्रमा**ख्यं
सन्नाटकं लिखितवान् जिनदेवसूरिः । कल्याणं भूयात् श्रीसर्वज्ञदेवचरण-
कमलयुगलप्रसादात् श्रीश्रमणसंघस्य ॥ श्रीः

दा (!) ८ प्र. १९ अर्जुननाटक छें

References.— 1 Mss—Aufrecht i, 335[b]; ii, 74[b].

2 Printed editions—The work is published in the Gaikwad Oriental Series, Vol. IV, 1917.

पार्थपराक्रम Pārthaparākrama

No. 95 37. / 1873–74.

Size.— $10\frac{2}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 5 leaves; 18 lines to a page; 60 letters to a line.

Description.— Country paper; Devanāgarī characters with पृष्ठमात्राs; fairly old but in good condition; hand-writing very small and closely written but clear, legible and uniform; borders on either side of the text ruled in triple black lines; a square blank space in the centre of each folio; red pigment frequently used; slight additions recorded in margins; complete.

Age.— Fairly old.

Author.— Prahlādanadeva Paramāra.

Begins.— fol. 1[a]

॥ ६० ॥ श्रीशारदायै नमः ॥

देवः स वः etc. as in No. 94.

Ends.— fol. 5[b]

तथापीदमस्तु ।

अन्नैरस्तु etc up to राज्यं भजंतु स्थिरं as in No. 94.

followed by इति निष्क्रांतास्सर्वे समाप्तोयं पार्थपराक्रमनामा व्यायोगः ॥ छ ॥ ग्रं. ४५५ ॥ छ ॥

References.— See No. 94.

पार्थपराक्रम Pārthaparākrama

No. 96 728. / 1886–92.

Size.— $10\frac{2}{5}$ in by $4\frac{2}{5}$ in.

Extent.— 4 leaves; 20 lines to a page; 66–70 letters to a line.

Description.— Country paper; Devanāgarī characters with पृष्ठमात्राs; hand-writing, very small and closely written but

clear, legible and uniform; a blank space partially filled by a red circle in the centre of each folio and similar circles in either margins; catch-words and colophons marked with red pigment; borders ruled in triple red lines; folios slightly moth-eaten; complete.

Age.— Saṁvat 1492.

Author.—Prahlādanadeva Paramāra.

Begins.—fol. 1[a]

॥ ५० ॥ श्रीशारदायै नमः ॥

देवः स वः etc. as in No. 94.

Ends.— fol 4[b]

तथापीदमस्तु ॥

अन्नैरस्तु etc. up to राज्यं भजंतु स्थिरं ॥ ६२ as in No. 94.

followed by इति निष्क्रांताः सर्व्वे ॥ छ ॥ परिसमाप्तोऽयं पार्थपराक्रमनामा व्यायोगः ॥ छ ॥ श्री ॥ छ ॥ संवत् १४९२ वर्षे फाल्गुनशुदि ९ आदित्यवारे लासापुरवरेऽलेखि ॥ छ ॥ छ ॥ शुभं भवतु ॥ छ ॥ श्रीः ॥

References.— See No. 94.

पार्वतीपरिणय Pārvatīparinaya

No. 97 148. / 1875-76.

Size.— $8\frac{2}{5}$ in. by $13\frac{1}{5}$ in.

Extent.— 67 leaves; 16-18 lines to a page; 15 letters to a line.

Description.— Modern paper with water-marks; Devanāgarī characters; bluish in appearance; hand-writing clear, legible and uniform; written on one side of the folios; complete; corrections recorded in margin; fol. 24 repeated.

Age.— A modern copy.

Author.— Bāṇabhaṭṭa. Cf. the following remarks of Keith "The *Pārvatīpariṇaya* once ascribed to Bāṇa is now allotted to Vāmana Bhaṭṭa Bāṇa (A. D. 1400)." Sanskrit Drama, p. 221.

Subject.— Describes the nuptials of Śiva and Pārvatī.

Begins.— fol. 1b

श्रीगणेशाय नमः ।

आदौ प्रेमकषायिता हरमुखव्यापारलोला शनै—
व्रीडाभारविधूर्णिता मुकुलिता धूमोद्गमत्याजतः ।
पत्युः सम्मिलिता दृशा सरभसव्यावर्तनैर्व्याकुला
पार्वत्याः परिणीतिमङ्गलविधौ दृष्टिः शिवायास्तु वः ॥ १ ॥

अपि च । संपदमतरलभ्यामनन्यसामान्यबाहुदर्पनिधेः ।
पुष्णातु चित्तयोनेरघटितघटनापटीयसी विभुता ॥ २ ॥

नान्यन्ते सूत्रधारः । सप्रणाममञ्जलिं बध्वा ।
ब्रह्मस्तम्बकुटुम्बस्य योगक्षेमविधायिनौ ।
आनन्दविग्रहौ भूत्यै भूयास्तामादिदंपती ॥ ३ ॥

इति पुष्पाञ्जलिं विकीर्य । नेपथ्याभिमुखमवलोक्य । आर्ये इतस्तावत् ।

प्रविश्य नटी । अज्ज इआह्मि ।

सूत्रधारः । आर्य अद्य खलु किमप्यभिनवं पार्वतीपरिणयं नाम नाटकं द्रष्टुमभिलषति परिषदेषा ।

नटी । अज्ज त उण अभिणवं कस्स कयिणो किदी भविस्सदि ।

सूत्र० अस्ति कविसार्वभौमो वत्सान्वयजलधिकौस्तुभो बाणः ।
नृत्यति यद्रसनायां वेधोमुखरङ्गलासिका वाणी ॥ ४ ॥

तद्विरचितेन विचित्रसंविधानेन वस्तुनानेन सामाजिकानवस्थास्यामहे ।
etc.

fol. 13 प्रथमोऽङ्कः ॥

fol. 25 द्वितीयोऽङ्कः ॥ २ ॥

Ends.— fol. 66

समधिगतसकलमनोरथागां नः किमतः परं प्रार्थनीयम् ।
तथापीदमस्तु भरतवाक्यम् ।

पर्जन्यो वृष्टिमिष्टां प्रदिशतु जगतो भद्रसंपादयित्री
शश्वत्सस्यैः प्ररूढैर्भवतु पुलकिता सर्वतो भूतधात्री

वर्धन्तां वीतविघ्नाः स्फुरदुपकृतयः संपदः सज्जनानां
नित्यानन्दो महेशो निरतिशयसुखप्राप्तये कल्पतां वः ॥ ११० ॥
इति निष्क्रांताः सर्वे ॥ पञ्चमोऽङ्कः ॥ इति श्रीभट्टबाणकृतं पार्वतीपरिणयं नाम नाटकं समाप्तम् ॥

References.— 1 Mss— Aufrecht's Catalogus Catalogorum i, 336ᵃ; ii, 75ᵃ; iii, 72ᵃ.

Descriptive Catalogue; Cf. Mad. Des. Cat. Vol. XXI No. 12539.

2 Printed Editions— 1 Ed. by Glaser, Wien 1883; 2 Published by the Vani Vilasa Press, Shrirangam, 1906.

प्रबोधचन्द्रोदय — Prabodhacandrodaya

No. 98 — 239. Viśrāma (i).

Size.— 9⅘ in. by 4⅘ in.

Extent.— 19 leaves; 11 lines to a page; 38 letters to a line.

Description.— Country paper; Devanāgarī characters; hand-writing beautiful, clear and uniform; complete.

Age.— Does not appear to be very old.

Author.— Kṛṣṇamiśra. According to Goldstücker, the author flourished about the end of the 12th century.

Subject.— A philosophical drama in six acts, treating of the different sects of religions and showing the superiority of the Advaita philosophy.

For further particulars see No. 26 of M. Seshagiri Shastri's Report No. 2. p. 67.

Begins.— fol. 1ᵃ

श्रीमंगलमूर्तये नमः ॥

मध्यान्हार्कमरीचिकास्विव पयः पूरो यदज्ञानतः
खं वायुर्ज्वलनो जलं क्षितिरिति त्रैलोक्यमुन्मीलति ।

यत्तत्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमं
सांद्रानंदसुपास्महे तदमलं स्वात्मावबोधं महः ॥ १ ॥
अंतर्नाडीनियमितमरुल्लंघितब्रह्मरंध्रं
स्वांते शांतिप्रणयिनि समुन्मीलदानंदसांद्रं ॥
प्रत्यग्ज्योतिर्जयति यमिनः स्पष्टलालाटनेत्र-
व्याजव्यक्तीकृतमिव जगद्व्यापिचंद्रार्धमौलेः ॥ २ ॥

सूत्रधारवाक्यं ॥ नीताः क्षयं क्षितिभुजो नृपतेर्विपक्षा
रक्षावती क्षितिरभूत्प्रथितैरमात्यैः ॥
साम्राज्यमस्य विहितं क्षितिपालमौलि-
मालार्चितं भुवि पयोधरमेखलायां ॥ ३ ॥
अस्ति प्रत्यर्थिपृथ्वीपतिविपुलबलारण्यमूर्च्छत्प्रताप-
ज्योतिर्ज्वालावलीढत्रिभुवनविवरो विश्वविश्रांतकीर्तिः ॥
गोपालो भूमिपालान् प्रसभमसिलतामात्रमित्रेण जित्वा
साम्राज्ये कीर्तिवर्मा नरपतितिलको येन भूयोभ्यषेचि ॥ ४ ॥

तेन च शांतप्रथप्रस्थितेन आत्मविनोदार्थं प्रबोधचंद्रोदयाभिधानं नाटकं अभिनेतुमादिष्टोस्मि ॥ etc.

fol. 3ᵃ इति प्रथमोंकः

fol. 7ᵃ इति द्वितियोंकः ॥ २ ॥

Ends.—fol. 18ᵇ

तथाप्येतदस्तु ॥
पर्जन्योस्मिन्जगति महतीं वृष्टिमिष्टां विधत्तां
राजानः क्ष्मागलितविविधोपप्लवाः पालयंतु ॥
तत्वोन्मेषोपहततमसस्त्वत्प्रसादान्महांतः
संसाराब्धिं विषयममतातंकपंकं तरंतु ॥
इति षष्टोंकः ॥ ५ ॥

References.— 1 Mss—Aufrecht, i 352ᵇ; ii 78ᵇ, 211ᵇ; iii, 75ᵃ.

Also See Madras Triennial Cat. of Sanskrit Mss. Vol. II. No. 1108 and I. O. Cat. Pt. VII Nos. 4138. Often printed with or without commentaries.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 99 526. / 1891-95.

Size.— $9\frac{3}{5}$ in. by $3\frac{3}{4}$ in.

Extent.— 75 leaves; 8-9 lines to a page; 28-30 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing, bold, clear and legible; borders ruled in triple black lines; folios 39 and 42, repeated; fol. 61[b], blank; fol. 63 is whitish in appearance and the hand-writing on it is different; the last colophon is written in red ink; complete.

Age.— Saṁvat 1670 (Śaka 1535).

Author.— Kṛṣṇamiśra.

Begins.— fol. 1[b]

॥ ६० ॥ श्रीगणेशाय नमः ॥

मध्याह्नार्कमरीचि etc. as in No. 98.

fol. 12[a] इति श्रीकृष्णमिश्रविरचिते प्रबोधचंद्रोदयनाटके कामापयानो नाम प्रथमोंकः ॥ १ ॥

fol. 27[b] इति ... ... द्वितीयोंकः समाप्तः ॥

Ends.— fol. 72[b]

पर्जन्योस्मिन् जगति etc. up to संसाराब्धि विषयममतातंकपंकं तरंतु ॥ as in No. 98.

followed by इति निःक्राता सर्वे जीवन्मुक्तिर्नाम षष्ठोंकः ॥

इति श्रीकृष्णमिश्रविरचिते प्रबोधचंद्रोदयनाटक संपूर्णं शुभं भूयात् ॥ ॥ संवत् १६७० वर्षे शाके १५३५ प्रवर्त्तमाने महामांगल्यप्रदमार्गशिरमासे शुक्लपक्षे तिथौ तृतीयायां वासरे अमरसरमध्ये ॥ लिषिते नरिसिंहेण ॥ शुभं भवतु ॥ कल्याणमस्तु ॥ पुत्रपौत्रादिपठनार्थे ॥ श्री ॥ श्री ॥

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 100 77. / 1883-84.

Size.— 10½ in. by 3¼ in

Extent.— 101 leaves; 5-6 lines to a page; 25 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing bold, clear and legible; borders ruled in two double black lines; red pigment used; edges of folios worn out; occasional notes; complete.

Age.— Appears to be old.

Author.— Kṛṣṇamiśra.

Begins.— fol. 1[b]

श्रीमहागणपतये नमः ॥

मध्याह्नार्कमरीचि etc., as in No. 98.

fol. 12[b] इति ब्रह्माद्वैतमहाकविश्रीकृष्णमिश्रकृतौ प्रबोधचन्द्रोदये कामापयानो नाम प्रथमोंकः ॥

fol. 31[b] इति ... ... महामोहप्रयाणो नाम द्वितीयोंकः ॥

Ends— fol. 100[b]

पर्जन्योस्मिन्जगति etc. up to संसाराब्धि विषयममतातंकपंकं तरन्तु ॥३०॥ as in No. 98.

followed by इति सर्वे निःष्क्रान्ताः ॥ छ ॥ श्री ॥ इति श्रीकृष्णमिश्रविरचिते प्रबोधचन्द्रोदये षष्टोंकः ॥

भूम्याकाशरसेन्दुभिर्विगणिते श्रीविक्रमार्कप्रभोः
शाके श्रावणमासि सोमादिवसे पक्षेव लक्षेतरे ॥
एकादश्यभिधे तिथौ लिखितवान्श्रीविष्णुदेवात्मजो
विद्वान्वि...प्रबोधसहितं चन्द्रोदयं नाटकम् ॥ १ ॥

श्री ॥ ॥ छ ॥ श्रीमहागणपतये नमः ॥ शुभमस्तु

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 101 34.
1898–99.

Size.— 9 in. by $4\frac{3}{4}$ in.

Extent.— 37 leaves; 13–14 lines to a page; 35 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear and legible; borders ruled in single black lines; red pigment used; folios worn out; folios 1 and 38 missing, otherwise complete.

Age.— Śaka 1546.

Author.— Kṛṣṇamiśra.

Begins.— (abruptly) fol. 2[a]

तिवाहिता दिवसाः ॥ इदानीं तु कृतकृत्या एव वयं ॥ यतः

नीताः क्षयं क्षितिभुजोनृपतेर्विपक्षा
रक्षावती क्षितिरभूत्प्रथितैरभाव्यैः ॥
साम्राज्यमस्य विहितं क्षितिपालमौलि-
भालार्चितं भुवि पयोनिधिमेखलायां ॥

तद्वयं शांतरसप्रयोगाभिनयेनात्मानं विनोदयितुमिच्छामः etc.
as in No. 98.

fol. 7[b] इति श्रीप्रबोधचन्द्रोदयनामनाटके कृष्णमिश्रविरचिते मंत्रसूत्रो नाम प्रथमोंऽकः समाप्तः ।

fol. 15[a] द्वितीयोंऽकः समाप्तः ।

Ends.— fol. 39[a]

पर्जन्योऽस्मिन् जगति etc. up to संसाराब्धिं विषयममतातंकपंकं तरंतु ॥ १ । as in No. 98.

followed by इति निष्क्रांताः सर्वे ॥ इति श्रीकृष्णमिश्रविरचिते प्रबोधचन्द्रोदयनाटके षष्टोंऽकः समाप्तः ॥ नाटकमपि समाप्तिमगमत् ॥ शाके १५४६ प्रवर्त्तमाने ॥ उत्तरायनगते श्रीमन् दिनमणौ ॥ ग्रीष्मऋतावाषाढमासे कृष्णपक्षे ७ रवौ नागमंडलवासिनो दीव्यज्ञातीये नव्य ॥ श्रीगणेशात्मजेनेदमलेखि । स्वार्थं

शाके षट्युगबाणचंद्रसुमिते मासे शुचौ पक्षके
कृष्णे चोत्तरमार्गमाश्रित...नेचेह भास्वत्तिथौ ।
भानोश्चाथ दिने हि सर्वगणितज्ञानैकग...र्गैकदं-
ताख्यस्यार्थसुतोऽलिखान्निजकृते रुद्रः शुभं नाटकं ॥ १ ॥ श्री ॥

fol. 37[b] इति श्रीकृष्णमिश्रविरचिते प्रबोधचन्द्रोदयनाटके षष्ठोऽङ्कः समाप्तः ॥ नाटकमपि समाप्ती गममत् ॥ राम ॥

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 102 527. / 1891-95.

Size.— 10 in. by $4\frac{1}{3}$ in.

Extent.— 35 leaves ; 12 lines to a page ; 35-40 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing clear, legible and uniform ; borders ruled in triple black lines ; red pigment used ; edges of folios worn out ; fol. 24 missing ; occassional notes in the margins ; complete.

Age.— Saṁvat 1650.

Author.— Kṛṣṇamiśra.

Begins.—fol. 1[b]

श्रीगोपालाय नमः ॥

मध्याह्नार्कमरीचि etc. as in No. 98.

fol. 6[a] इति प्रबोधचन्द्रोदयाभिधाननाटके प्रथमोंकः ।

fol. 13[a] द्वितीयोंकः ।

Ends.— fol. 36[a]

पर्जन्योऽस्मिन् जगति etc. up to संसाराब्धि विषयमतातंकपंकं तरंतु as is No. 98.

followed by इति निःक्रांताः सर्वे ॥

इति प्रबोधचन्द्रोदयाभिधाने नाटके षष्ठोंकः ॥

संवत् १६५० वर्षे चैत्रशुदि ११ दिने लिखितं ॥ छ ॥ छ ॥ श्रीः ॥ रा ॥ मा ॥ य ॥ न ॥ मः ॥ ॥ छ ॥ छ ॥

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 103 377. / 1884-87.

Size.— 8⅝ in. by 5 in.

Extent.— 55 leaves ; 12 lines to a page ; 28 letters to a line.

Description.— Country paper ; Devanāgaī characters ; old in appearance ; hand-writing bold, clear and legible ; borders ruled in double black lines ; red pigment used ; folios worn out and moth-eaten ; complete.

Age.— 1672.

Author.— Kṛṣṇamiśra.

Begins.— fol. 1[b]

॥ श्रीकर्दमेश्वराय नमः । श्रीगोपीजनवल्लभाय नमः ।

श्रीगणाधिपतये नमः ।

मध्याह्नार्कमरीचि etc. as No. 98.

fol. 10[a] प्रबोधचन्द्रोदयनाटके प्रथमोंकः समाप्तः ॥ छ ॥

fol. 21[b] इति प्रबोधचन्द्रोदये द्वितीयोंकः । समाप्त । छ ॥

Ends.— fol. 55[a]

पर्जन्योस्मिन् जगति etc. up to संसाराब्धि विषयममतातंकपंकं तरंतु ॥३४॥ as in No. 98.

followed by इति श्रीप्रबोधचंद्रोदये जीवन्मुक्तिर्नाम षष्टोंकः समाप्तः ।

समाप्तं प्रबोधचन्द्रोदयाभिधानं नाटकं ॥ श्रीरस्तु ॥ छ ।

काल्याणमस्तु ॥ श्रीकर्दमेश्वरप्रसादाल्लिखितोयं ग्रंथः ।

श्रीगोपीजनवल्लभो जयतु ॥ संवत् १६७२ वर्षे कार्तिकशुदि ५ तिथौ भल्लपुरीनिवासी भट्टश्रीबलभद्रस्यात्मजगणेशाभिधानेन लिखितं ॥

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 104 459. / 1895–1902.

Size—. $10\frac{1}{2}$ in. by $3\frac{3}{4}$ in.

Extent.— 54 leaves; 8 lines to a page; 30–35 letters to a line.

Description.— Old country paper; Devanāgarī characters; hand-writing clear and legible except some folios where some letters cannot be deciphered; borders ruled with double black lines; edges of folios worn out and moth-eaten; red pigment used; white chalk also used; complete.

Age.— Saṁvat 1595.

Author.— Kṛṣṇamiśra.

Begins— fol. 1^b

सिद्धिः ॥ गणपतये नमः ॥

मध्याह्नार्कमरीचि etc. as in No. 98.

fol. 9^b प्रथमोङ्कः ॥

fol. 20^b श्रद्धापकर्षणं नाम द्वितीयोङ्कः ॥

Ends.— fol. 53^b

पर्जन्योर्स्मिजगति etc. up to संसाराब्धि विषयममतातंकपंकं तरन्ति । छ ॥ as in No. 98.

followed by इति निःक्रान्ता सर्वे प्रबोधचन्द्रोदये जीवन्मुक्तिनाम षष्ठोंकः ॥ ॥ इति ब्रह्म···महाकविकृष्णमिश्रविरचितं प्रबोधचन्द्रोदयाख्यं नाटकं समाप्तं ॥ शुभमस्तु ॥ गोपालाय नमः ॥ ॥ कृष्णार्पणमस्तु ॥ संवत् १५९५ वर्षे वैशाषवदि भौमे ॥···तंवतभद्रेण नाटकं नाटकोत्तमं ॥ कृतो यत्कृष्णमिश्रैस्तु नाम्ना चन्द्रोदयं स्मृतम् ॥

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 105 445. / 1884-87.

Size.— $7\frac{7}{10}$ in by $3\frac{3}{4}$ in.

Extent.— 70 leaves; 9 lines to a page; 28 letters to a line.

Description— Modern paper with water-marks; Devanāgarī characters; hand-writing clear and legible but not uniform; borders ruled in double black lines; yellow pigment used for corrections; edges moth-eaten; complete.

Age.— Śaka 1629.

Author.— Kṛṣṇamiśra.

Begins.— fol. 1[b]

श्रीगणेशाय नमः
मध्याह्नार्कमरीचि etc. as is No. 98.

fol. 13[b] इति श्रीकृष्णमिश्रविरचिते प्रबोधचन्द्रोदये प्रथमोंकः ॥ १ ॥

fol. 31[b] द्वितीयोंकः ॥ २ ॥ छ ॥

Ends.—fol. 69[b]

पर्जन्योस्मिन्जगति । etc. up to संसाराब्धि विषयसमतातंकपंकं तरंतु ॥ as in No. 98.

followed by इति निष्क्रांताः सर्वे ॥ इति श्रीकृष्णमिश्रविरचिते प्रबोधचन्द्रोदये नाटके षष्ठोंकः ॥ ॥ श्रीः ॥

शके १६२९ सर्वजित्संवत्सरे पौषकृष्णदशम्यां भौमे लिखितमिदं समाप्तिमगमत् ॥

on fol. 70[b] there is an endorsement in Kanarese characters.

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 106 426. / 1877-91.

Size.—$10\frac{1}{2}$ in. by $4\frac{4}{8}$ in.

Extent.— 43 leaves; 10 lines to a page; 36 letters to a line.

Description.— Country paper, old in appearance; Devanāgarī characters; hand-writing clear, legible and uniform; borders ruled in double black lines; red pigment often used; edges of folios worn out; complete.

Age.— The Ms. appears to be old.

Author.— Kṛṣṇamiśra.

Begins.— fol. 1[b]

॥ श्री ॥ ॐ नमो ब्रह्मणे ।

मध्याह्नार्कमरीचि etc. as in No. 98.

fol. 7[b] प्रथमोंकः ॥ छ ॥

fol. 17[b] द्वितीयोंकः

Ends.-- fol. 43[b]

पर्जन्योस्मिन् जगति etc., up to संसाराब्धिं विषयममतातंकपंकं तरंतु ॥ as in No. 98.

followed by इति निःक्रांताः सर्वे षष्टोऽकः समाप्तः ॥ समाप्तमेतत्प्रबोधचंद्रोदयं नाम नाटकं ॥

Reference.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 107 149. / 1882-83.

Size.— $7\frac{3}{4}$ in. by $3\frac{3}{4}$ in.

Extent.— 60 leaves; 10 lines to a page; 30 letters to a line.

Description.— Country paper ; Devanāgarī characters ; hand-writing small, but clear and legible ; borders ruled in double black lines ; complete.

Age.— Saṁvat 1676 (Śaka 1542).

Auther.— Kṛṣṇamiśra.

Begins.— fol. 1[b]

श्रीवरदमूर्त्तिर्विजयते ॥

॥ मध्याह्नार्कमरीचि etc. as in No. 98.

fol. 10[a] इति श्रीप्रबोधचन्द्रोदये नाटके प्रथमोंऽकः ॥ १ ॥

fol. 20[b] इति ,, ,, द्वितीयोंऽकः ॥ २

Ends--- fol 59[b]

पर्जन्योस्मिन्जगति etc. up to संसाराब्धिं विषयममतातंकपंकं तरंतु ॥
as in No. 98.

followed by इति निष्क्रांताः सर्वे ॥ इति श्रीकृष्णमिश्रविरचिते प्रबोधचन्द्रोदयो नाम षष्ठोंऽकः ॥ समाप्तिमगमत् ॥

संवत् १६७६ वर्षे शके १५४२ प्रवर्त्तमानेऽमूरपुरनिवासिना ज्योतिर्विद्गोवालस्यात्मजेन भट्टकल्याणेन लिखितमिदं प्रबोधचन्द्रोदयाभिधानं नाटकं ॥

मासि भाद्रपदे शुक्ले प्रतिपद्गुरुवासरे ।
लिखितं नाटकं चैतत्कल्याणेन द्विजन्मना ॥ १ ॥

श्रीरस्तु ॥ कल्याणं भूयात् ॥

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 108 464. / 1899-1915.

Size.— $10\frac{1}{2}$ in. by $4\frac{3}{10}$ in.

Extent.— 41 leaves ; 11 lines to a page ; 35 letters to a line.

Description.— Country paper ; Devanāgarī characters ; hand-writing bold, clear and legible ; borders ruled in two double black lines ; red pigment used for marking the portion ; yellow pigment used for corrections ; occasional notes in the margins ; complete.

Age.— Saṁvat 1665.

Author.— Kṛṣṇamiśra.

Begins.—fol. 1[b]

॥ ६० ॥ मध्याह्नार्कमरीचि etc. as in No. 98.

fol. 7[a] प्रथमोंकः समाप्तः ॥

fol. 15[a] द्वितीयोंकः समाप्तः ॥

Ends.— fol. 14[b]

पर्जन्योस्मिन्जगति etc. up to संसाराब्धिं विषयममतातंकपंकं तरंतु । ३१ । as is No. 98.

followed by इति श्रीनिःक्रांताः सर्वे जीवन्मुक्ति नाम षष्टोऽकः । समाप्तं चेदं प्रबोधचन्द्रोदयं नाम नाटकं ॥ ॥ संवत् १६६५ वर्षे आसो जवदि १० दिने मिश्रद्वारका ग्रंथ लिषावतं ॥ पं० नरबदलिषतं ॥ कल्याणं विपुलं भूयात् ॥ श्रीरस्तु । श्री ॥

अंडजाः पक्षिसर्पाद्याः । पोतजाः कुंजरादयः ।
सजाः मद्य कीटाद्या वृगवाद्या जरायुजाः ॥ १ ॥
यूकाद्याः स्वेदजा मत्स्यादयसमुच्छ्रनोद्भावाः
उद्भिदस्वंजना सोयपादूकादेव ना रका ॥ २ ॥
विलासिनीनां स.....जाविलासास्त एव मूढस्य हृदि स्फुरंति
रागो नलिन्या हि निसर्गसिद्धस्तत्र भ्रमत्येव मुधा षमंहिं ॥

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 109 446. / 1884–87.

Size.— $11\frac{3}{4}$ in. by 4 in.

Extent.— 44 leaves ; 7 lines to a page ; 38 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; hand-writing clear, legible and uniform ; red pigment used.

The Ms. contains acts 3–6.

Age.— Not old.

Author.— Kṛṣṇamiśra.

Begins.— 1[b]

श्रीगणेशाय नमः ॥

॥ ततः प्रविशति शांतिः करुणा च ॥ शांतिः सान्न ॥ मातः २

क्वासि देहि मे प्रियदर्शनं

मुक्तातंककुरंगकाननभुवः शैलाः स्खलद्वारयः

पुण्यान्यायतनानि संततपो निष्ठाश्च वैखानसः ॥

यस्याः प्रीतिरमीषु सात्र भवती चंडालवेश्मोदरं

प्राप्ता गौः कपिलेव जीवति कथं पाषंडहस्तंगता ॥ ७० ॥ etc.

fol. 14[b] इति पाषंडविडंबनो नाम तृतीयोंकः ॥ छ ॥

Ends.— fol. 43[b]

पर्जन्योस्मिन्जगति etc. up to संसाराब्धि विषयममतातंकपंकं तरंतु ॥१८३॥
as in No. 98.

followed by ॥ इति निःक्रांतः सर्व ॥ इति षष्टांकः समाप्तः ॥ छ ॥

इति प्रबोधचन्द्रोदयनाम नाटक समाप्त ॥ छ ॥

श्रीपांडुरंगार्पणमस्तु ॥ श्रीविट्ठलार्पणमस्तु ॥

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 110 ~~731.~~ 1886-92.

Size.— 8½ in. by 5 in.

Extent.— 37 leaves; 15 lines to a page; 32 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear and legible; borders ruled in double black lines; red pigment used; complete.

Age.— Saṁvat 1688.

Author.— Kṛṣṇamiśra.

Begins.— fol. 1[b]

॥ श्रीगोपीजनवल्लभाय नमः ॥ श्रीविश्वेश्वराय नमः ॥ श्रीवृद्धाकालाय नमः ॥
मध्याह्नार्कमरीचि etc. as in No. 98.

fol. 8[a] इति ब्रह्माद्वैतमहाकविश्रीकृष्णमिश्रकृतौ प्रबोधचन्द्रोदये कामापयानो नाम प्रथमोंकः ॥

fol. 14[b] इति प्रबोधचन्द्रोदये द्वितीयांकः ॥

Ends.— fol. 37[a]

पर्जन्योस्मिन् जगति etc. up to संसाराब्धि विषयममतातिकपकं तरंतु ॥
as in No. 98.

followed by इति श्रीकृष्णमिश्रविरचिते प्रबोधचन्द्रोदये जीवन्मुक्तिर्नाम षष्टोंकः ॥ संवत् १६८८ वर्षे श्रावणमासे कृष्णपक्षे त्रयोदश्यां शनौ लिखितमिदं मनोहरेण वाचकेन स्वपठनार्थे परोपकृत्यै च ॥ शुभं भवतु ॥ छ ॥ श्रीरस्तु ॥ छ ॥ छ ॥ स्वस्त्यस्तु ॥

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 111 730. / 1886-92.

Size.— $8\frac{3}{4}$ in. by $3\frac{2}{5}$ in.

Extent.— 59 leaves; 8 lines to a page; 36 letters to a line.

Description.— Old country paper; Devanagari characters; hand-writing clear, legible and uniform; borders of folios 1-28 ruled in two double red lines, the rest in two double black; some of the folios yellowish in appearance; edges of some folios torn; fol. 1 seems to be pasted on another leaf; complete.

Age.— Appears to be old.

Author.— Kṛṣṇamiśra.

Begins.—fol. 1[b]

॥ श्री० ॥ ॥ श्रीगणेशाय नमः ॥
मध्याह्नार्कमरीचि etc. as in No. 98.

fol. 10[b] इति श्रीप्रबोधचन्द्रोदये नाटके प्रथमोंकः ॥

fol. 22[b] इति „ „ द्वितीयोंकः ॥ २ ॥

Ends.— fol. 59[a]

पर्जन्योस्मिन् जगति etc. up to संसाराब्धि विषयममतातंकपंकं तरंतु ३४
as in No. 98.

followed by इति उल्का निःक्रांताः पुरुषं विष्णुभक्तिप्रबोधचंद्रादयः सर्वे ॥

बोधचन्द्रोदयं नाम दुर्मोहतमसो रविं ॥
निर्मितं कृष्णमिश्रार्यैस्तत्वबोधाय नाटकं ३५

इति श्रीप्रबोधचन्द्रोदये नाटके पुरुषस्य जीवन्मुक्तितत्वज्ञानं नाम षष्ठोंऽकः
समाप्तमिदं प्रबोधचंद्रोदयं ना

References.— Same as in No. 98.

प्रबोधचन्द्रोदय Prabodhacandrodaya

No. 112 152. / 1875-76.

Size.— 6⅜ in. by 8¼ in.

Extent.— 43 leaves; 17-23 lines to a page; 19-21 letters to a line.

Description.— Country paper; Śāradā characters; hand-writing clear and legible but not uniform; yellow pigment used for corrections.

Age.— Appears to be fairly old.

Author.— Kṛṣṇamiśra.

Begins.—

ॐ नमो गुरवे सरस्वतीरूपाय ॥ शुभमस्तु ॥ तत्सत् ॥
ॐ मध्यानार्के मरीचिकास्विवपयः पूरोयदज्ञानतः ।
रवं वायुर्ज्वलनोजलंक्षितिरिति त्रैलोक्यमुन्मीलति ॥
यत्तत्त्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमं ॥
सांद्रानंदमुपास्महे तदमलं स्वात्मावबोधं महः ॥
अपि च । अंतर्नाडीनियमित मरुल्लुंधितब्रह्मरंध्रम्
स्वांते शांति प्रणयिनिसमुन्मीलदानंद सांद्रम् ॥

प्रत्यग्ज्योतिर्जयति यमिनः स्पष्टलालाटनेत्र-
व्याजव्यक्तीकृतमिव जगव्यापि चंद्रार्धमौलेः ॥
नांद्यंते सूत्रधारः आदिष्टोस्मि सकलसामंतचक्रचूडामणि मरीचि मंजरी
नीराजितचरण कमलेन बलवदरि निवह वक्षस्तटकवाटपाटन-

Ends.—

पर्जन्योस्मिन् जगति महतीं वृष्टिमिष्टां विधत्तां
राजानः क्ष्मां गालितनिखिलोपप्लवां पालयंतु ।
तत्तन्मेषोपहततमसस्त्वत्प्रसादान्महांतः
संसारांते विषममतातंकपंकात्तरंतु ॥ ४४ ॥
इति निष्कांताः सर्वे ॥ ४४ ॥
इति श्रीप्रबोधचंद्रोदयनाटके श्रीकृष्णमिश्रविरचिते जीवन्मुक्तिर्नाम षष्ठोंकः
॥ ६० ॥ समाप्तं चेदं प्रबोधचन्द्रोदयो नाटकम् ॥
जयत्यनंत्य(न्य)सामान्य(त्य)प्रकृष्टगुणवैभवः ।
संसारनाटकारंभ निर्वाहण कविः शिवः ॥ ॐ ॥ ४४ ॥

References.— See No. 98.

प्रबोधचन्द्रोदय
with
टीका चिच्चंद्रिका

Prabodhacandrodaya
with
Commentary Ciccandrikā

No. 113

92.
1919-24.

Size.— $12\frac{1}{4}$ in. by $4\frac{4}{5}$ in.

Extent.— 105 levaes ; 2-3 lines to a page ; 40 letters to a line (text).
6-8 ,, ,, ,, ,, 45 ,, ,, ,, ,, (com).

Description.— Smooth country paper ; Devanāgarī characteis ; hand-writing clear and legible but not uniform ; borders ruled in two double black lines ; red pigment used ; some folios without borders ; text in the middle with the comm. above and below it ; complete.

Age.— Saṁvat 1842.

Author (of the text).— Kṛṣṇamiśra.

,, (,, ,, comm.)— Gaṇeśa, son of Viśvanātha Dīkṣita.

Subject.— A commentary on the Prabodhacandrodaya of Kṛṣṇamiśra.

Begins— (text) fol. 2[a]

श्रीपरमात्मने नमः ॥

मध्याह्नार्कमरीचि etc. as in No. 98.

,, (com.) fol. 1[b]

श्रीगणेशाय नमः

पदमानादिदं विश्वं यद्भातात्रेह किंचन
तन्महः परमानंदं वंदे निर्विघ्नकारणं १

अथास्य प्रबोधचन्द्रोदयाभिधेन नाटकस्य प्रवृत्तिप्रयोजनमभिधीयते। ब्रह्माज्ञानजनितादि संसारसागरनिमग्नानामविवीर्णाभुकविबद्धनाटकादिकथास्वादमनसां संसारिणां परमकारुणिकः श्रीकृष्णमिश्रः संसार समुच्छेदाय नाटकव्याजेन शृंगारादिरसैरुपसिच्य वेदांतसिद्धांतमंतःकरणेषु दृढयन् नाटकमारब्धवान्। तत्र च यद्यपि विवरणोपायाः पूर्वसूरिभिर्निरूपिता बहव उपलभ्यंते तथाप्यनभ्यस्तकाव्यव्याकरणानामनधीतशास्त्राणामेतद्बोधविरहव्याकुलितचेतसां सचेतसां प्रयोजनाय नालमिति चिच्चंद्रिकाविवरणं संक्षिपन्नतिसुबोधमारब्धुमुपकल्पतेतिशयेन भवानीं भावयन् भावागणेशस्तत्र प्रारीप्सित प्रतिबंधकविघ्नविघातमुद्दिश्य कृतं मंगलं शिष्टाचारं संबध्नन्नुपनिबध्नाति ॥ मध्यान्हेति वयमित्यध्याहारः। महस्तेजः प्रकाशरूपमिति यावत्। उपास्महे संचिंतयामः। etc.

fol. 18[b] इति श्रीभावाविश्वनाथदीक्षितसूनुगणेशविरचितायां प्रबोधचन्द्रोदयीय चन्द्रिकायां प्रथमोंकः ॥

fol. 37[b] प्रबोधचन्द्रोदयीयचिच्चन्द्रिकायां द्वितीयोंकः ॥

fol. 53[a] इति ... ... तृतीयोंकः ॥

Ends.— (text) fol. 104[a]

उत्तिष्ठ वत्स किं ते भूयः प्रियमुपकरोमि। etc. up to संसाराब्धिं विषयममतातर्पकं तरंतु ॥ as in No. 98.

followed by ॥ विष्णुभक्तिः। तथास्त्विति निष्क्रांताः सर्वे षष्ठोंकः ॥ इति श्रीकृष्णमिश्रविरचितं प्रबोधचन्द्रोदयं नाटकम् समाप्तम् संवत् १८४२ माघमासे शुक्लापक्ष ७ रवीवार

Ends.— (com.) fol. 105[a]

जीवस्य हि मोहपुरःसराः कामक्रोधलोभादयो मुक्तिपरिपंथिनः पाषंड-शास्त्राणि । तदागमाश्च । एवं सति विष्णुभक्त्यैकसहायेन मुमुक्षुणा वस्तु-विचारेण कामं क्षमया क्रोधं संतोषेण लोभमित्यादि पूर्वोक्तरीत्या कामादीन् पाषंडागमशास्त्राणि च विजित्य श्रवणं विधाय पश्चाद्विवेकसहायेन मनसा मननं कृत्वा निदिध्यासनं च विधाय तत्वसाक्षात्कारो जननीयः तेन च मोह-नाशः संपादनीयः । एवं च सति प्रारब्धे जीवन्मुक्तिरसति च परममुक्तिरित्यल-मतिविस्तरेण ।

आसीद्भावोपनामा भुवि विदितयशा रामकृष्णोति विज्ञ-
स्तस्माद्धीर्यो विनीतो विविधगुणनिधिर्विश्वनाथोवतीर्णः
तस्मात्प्रख्यातकीर्तेर्विविधमखकृतः प्रादुरासीद्भवान्यां
श्रीमत्यां यो गणेशो भुवि विदितगुणा तस्य चिच्चंद्रिकास्तु ।
न प्राकृतं व्यक्तमिहास्ति किंचिन्मयेति संतः श्रुतिगोचरस्य वः ।
करोमि तेनास्तु निरंकुशेयं चिच्चन्द्रिकानंदविबोधनाय ।
ज्ञानतोऽज्ञानतो वा पि सुष्ठु वाऽसुष्ठु यत् कृतम् ।
तद्भो क्षमध्वं सद्वृत्ताः परीक्षयत सादरम् ॥ ६ ॥

इति श्रीभावाविश्वनाथदीक्षितसूनुगणेशविरचितायां प्रबोधचन्द्रोदयीय-चिच्चन्द्रिकायां षष्ठोंकः समाप्तः ॥

References.— 1 Mss— Aufrecht's Catalogus Catalogorum i, 353[a]; ii, 79[a]; iii, 75[a].

Descriptive Catalogue I. O. Cat. Pt. VII. No. 4143.

प्रबोधचन्द्रोदय
with
टीका चिच्चन्द्रिका

Prabodhacandrodaya
with
Commentary Ciccandrikā

No. 114

425.
1892-95.

Size.— 10 in. by $4\frac{4}{5}$ in.

Extent.— 74 leaves ; 4-6 lines to a page ; 35-40 letters to a line (text).
7-10 ,, ,, ,, ,, ,, ,, ,, ,, ,, (com.).

Description.— Thick country paper; Devanāgarī characters; hand-writing bold, clear and legible but not uniform; borders and edges of folios 1-23 ruled in double red lines; the rest have no ruled borders; red pigment used; yellow pigment used for corrections; text in the middle with the commentary above and below it; folios 59-74 seem to be written in a different hand; folio 1 is torn; complete.

Age.— Not very old.

Author (of the text).— Kṛṣṇamiśra.

„ („ „ com.).— Gaṇeśa.

Begins— (text) fol. 1[b]

मध्याह्नार्कमरीचि etc. as in No. 111.

„ (com.) fol. 1[b]

॥ ॐ ॥ श्रीअघनाशनकीर्त्तनाय नमः ॥
रामं विनायकं वंदे सदानंदगुणाकरं
संसारतापसंहारकारणं विघ्नकारणम् १
अथ कथमप्यन्तेवासिनं बहुशोध्यापितवेदांतसिद्धान्तमपि तत्वावबोधपराङ्मुखं नाटकादि रसिकाः परमकारुणिकाः श्रीकृष्णमिश्राः प्रबोधचन्द्रोदयाख्य-नाटकव्याजेन तं बुबोधयिषवस्तद्रचयन्ति । स्म । तत्राय पद्यद्वये नांदीसंज्ञके निर्विघ्नपरिसमाप्तये कृतं मंगलं निबध्नाति ॥ मध्याह्नेति वयं तदौपनिषदमहस्तेज उपास्महे सेवयामः etc.

fol. 11[b] इति श्रीप्रबोधचन्द्रोदयव्याख्याने प्रकाशे प्रथमोंकः ॥

fol. 24[b] इति श्रीप्रबोधचन्द्रोदयप्रकाशे द्वितीयोंकः

Ends.— (text) fol. 73[a]

उत्तिष्ठ वत्स किं ते भूयः प्रियमुपकरोमि etc. up to संसाराब्धि विषयममता-तंकपंकं तरंतु ३३ as in No. 111.

followed by तथास्त्विति निष्क्रांताः सर्वे समाप्तोयं षष्ठोंकः ६

इति श्रीकृष्णमिश्रविरचितं प्रबोधचन्द्रोदयं नाटकं समाप्तिमगात् ६ श्रीरस्तु ॥

Ends.— (com.) fol. 73[b]

जीवस्य हि मोहपुरःसराः etc. up to परीक्षयत सादरम् १

as in No 113.

followed by इति श्रीभावाविश्वनाथदीक्षितसूनुगणेशविरचितायां प्रबोधचन्द्रोदयीयाचिच्चन्द्रिकायां षष्ठोंकः समाप्तिमगमत् १ ।
शुभं भवतु ॥ कल्याणमस्तु ॥ श्रीरस्तु ॥

On folio 1ª we have—

नाटकादौ च विघ्नविघाताय नांदी कार्या यदाह भरतः
यद्यप्यंगानि भूयांसि संति वै नाटकादिषु
तथाप्यवश्यं कर्त्तव्यं नांदी विघ्नप्रशांतये
देवद्विजनृपादीनां(ना)माशीर्वचनपूर्विका
नांदी कार्या बुधैर्नाम्ना नमस्कारेण संयुतेति नांदीलक्षणं
काचिद्द्वादशपदा नांदी काचिदष्टपदा तथा
सूत्रधारं पठेदेनां मध्यमस्वरसंयुतामिति ॥
रंगं प्रसाद्य मधुरै श्लोकैः काव्यार्थसूचकै
रूपकस्य कवेराख्यां गोत्राद्य ··च कीर्त्तयेदिति भरतशास्त्रात्
रुणद्धि रोदसी चास्य यावत्कीर्त्तिरनीश्वरी ।
तावत्किलायमध्यास्ते सुछती वै बुधपदमिति श्रुतेश्च
कवेर्गोत्रनामादिकीर्त्तनमप्युचितमिति स्वनाम कीर्त्तयति कृष्णमिश्रेति

References.— Same as in No. 113.

प्रबोधचन्द्रोदय
with
टीका चिच्चन्द्रिका

Prabodhacandrodaya
with
Commentary Ciccandrikā

No. 115

460.
1895-1902.

Size.— $9\frac{3}{4}$ in. by $4\frac{3}{5}$ in.

Extent.— 103 leaves ; 5 lines to a page : 36 letters to a line (text).
8 ,, ,, ,, ,, 45 ,, ,, ,, ,, (com.).

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing legible but not quite clear ; borders ruled in double red lines ; some in triple ; white chalk used for corrections ; edges of folios worn out ; slightly moth-

eaten; folio 1 pasted with paper-slips; text in the middle with commentary above and below it; commentary incomplete.

Age.— Appears to be old.

Author (of the text).— Kṛṣṇamiśra.

,, (,, ,, com.).— Gaṇeśa.

Begins.— (text) fol. 2[a]

मध्याह्नार्कमरीचि etc. as in No. 111.

,, — (com.) fol. 1[b]

॥ ६० ॥ ॐ नमो श्रीगणेशाय नमः श्रीसरस्वत्यै नमः ॥
यदभावनादिदं विश्वं etc. as in No. 113.

fol. 19[b] इति श्रीभावाविश्वनाथदीक्षितसूनुगणेशाविरचितायां प्रबोधचन्द्रोदयांकाचिच्चन्द्रिकायां प्रथमोंकः

fol. 38[b] इति ... ... द्वितीयोंकः

Ends.— (text) fol. 103[b]

उत्तिष्ट वत्स किं ते भूयः प्रियमुपकरोमि etc. up to सं...ब्धि विषयममता-तंकपंकं तरंतु ॥ as in No. 111.

followed by विष्णुभक्तिः तथास्तु ॥ इति निःक्रांताः सर्वे षष्टोंकः ॥

इति श्रीप्रबोधचं.....नाटकं समाप्तम् ॥

Ends.— (com.) fol. 103[b]

तथा च ज्ञानिनो विरक्तसर्वथा प्रयोजनाभावान्नगभनादिप्रियामान किंचिच्च...चरिष्यत्यर्थे स्थलनियमोपेक्षित इति तात्पर्यं प्रशांतारातिं...मोहं... परं उत्कृष्टम्

References.— Same as in No. 113.

प्रबोधचन्द्रोदयटीका called चिच्चन्द्रिका

Prabodhacandrodayaṭīkā called Ciccandrikā

No. 116

447.
1884-87.

Size.— 11 in. by 5 in.

Extent.— 53 leaves; 13-14 lines to a page; 40-45 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear, legible and uniform; folios numbered in both the margins; fol. 43 slightly moth-eaten; folio 53 slightly torn; complete.

Age.— Not very old.

Author.— Gaṇeśa.

Begins.— fol. 1[b]

श्रीगणेशाय नमः
यदभानादिदं विश्वं etc. as in No. 113.

fol. 10[a] इति श्रीभावार्थविश्वनाथदीक्षितसूनुगणेशविरचितायां प्रबोधचन्द्रोदयीयचन्द्रिकायां प्रथमोंकः १

fol. 19[a] प्रबोधचन्द्रोदयीयाचिचंद्रिकायां द्वितीयोंकः २

Ends.— fol. 52[b]

जीवस्य हि मोहपुरः etc. up to परीक्षयत सादरम् १
as in No. 113.

followed by इति श्रीभावाविश्वनाथदीक्षितसूनुगणेशविरचितायां प्रबोधचन्द्रोदयीयाचिच्चंद्रिकायां षष्टोंकः समाप्तः छ छ छ
श्रीगजाननार्पणमस्तु

References.— Same as in No. 113.

प्रबोधचन्द्रोदय with प्रकाश

Prabodhacandrodaya with Prakāśa

No. 117

55.
1869-70.

Size.— 12⅖ in. 8 in.

Extent.— 82 leaves ; 4-6 lines to a page ; 32 letters to a line (text).
8-10 ,, ,, ,, ,, 40 ,, ,, ,, ,, (com.).

Description.— Blue paper with water-marks ; Devanāgarī characters ; hand-writing clear, legible and uniform ; borders ruled in double red lines ; comm. above and below the text ; complete ; last folio slightly torn.

Age.— A modern copy.

Author (of the text).— Kṛṣṇamiśra.

,, (,, ,, comm.).— Rāmadāsa Dīkṣita.

Begins.— (text) fol. 1ª

श्रीलक्ष्मीनृसिंहाय नमः ॥

मध्याह्नार्कमरीचि etc. as in No. 111.

,, (com.) fol. 1ª

श्रीगणेशाय नमः ॥

रामं विनायकं वंदे सदानंदं गुणाकरं ॥

संसारतापसंहारकारणं विघ्नवारणं ॥ १ ॥

अथ कमप्यंतेवासिनं बहुशोध्यापितवेदांतसिद्धांतमपि तत्रावबोधपराङ्मुखं नाटकादि रसिकं परमकारुणिकाः श्रीकृष्णमिश्राः प्रबोधचन्द्रोदयाख्य-नाटकव्याजेन तं बोधविषयस्तद्रचयंति स्म । तत्राद्यपद्यद्वये नांदीसंज्ञके निर्विघ्न-परिसमाप्तये कृतं मंगलं निबध्नंति । तत्र नांदीस्वरूपं ।

नंदंति काव्यानि कवींद्रवर्गाः कुशीलवाः परिषदाश्च संतः ।

यस्मादलं सज्जनसिंधुहंसी तस्मादियं सा कथितेति नांदी ।

इति नांदीस्वरूपं । तल्लक्षणं च । आशीर्नमस्क्रियावस्तुश्लोकः काव्यार्थ सूत्रकः । नांदीति गद्यगदितपदैर्द्वाद(श)भिस्तथा । इति नांदीस्वरूपलक्षणलक्षितमाद्य-पद्यद्वयं । तत्रायं पद्यं व्याख्यायते । मध्यान्हेति । वयं तत् । औषनिषदं महस्तेजः । उपास्महे । सेवयामः । etc.

fol. 12b इति श्रीप्रबोधचन्द्रोदयव्याख्याने प्रकाशाख्ये प्रथमोऽकः ॥

fol. 28b इति० प्रकाशे० द्वितिः०

Ends.— (text) fol. 82a

तथाप्येतदस्तु । पर्जन्योस्मिन् etc. up to संसाराब्धि त्रिषयममतातंकपंकं तरंतु ॥ ३२ ॥ as in No. 111.

followed by इति निःक्रांताः सर्वे । इति श्रीमत्प्रबोधचन्द्रोदयाख्ये श्रीकृष्णमिश्रविरचिते नाटकसारे षष्टोंकः ॥ ६ ॥ राम ॥

Ends.— (com.) fol. 82a

श्रीकृष्णमिश्राः ग्रंथांते आशीर्लक्षणं मंगलमाचरंति । तथाप्येतदस्तु । पर्जन्य इति । पर्जन्यो जलपूर्णमेघः । अस्मिन् जगति अस्यां भूमौ महतीं मिष्टां समये यावदपेक्षितामिष्टामिति पदेनातिवृष्टि निवारयंति विघ्नां करोति । गालितो नष्टः उपद्रवोदेशराज्याद्युपद्रवो येभ्यस्ते राजानः क्ष्मां पृथिवीं पालयंतु । संसारिभ्य आशिषो दत्वा ज्ञानिभ्योपि ददाति । महांतः ज्ञानिनस्त्वत्प्रसादाद्विष्णुभक्तिप्रसादात्संसारएवाब्धि(:) समुद्रः तं तरंतु कीदृशं समुद्रं । विषयाः स्त्रगादयः ममत्वाभिमानिनः आतंको भयं एतान्येव पंक कर्दमो यस्मिंस्तं । कीदृशा महांतः । तत्वानां उन्मेषः साक्षात्कारः तस्मादुपहतं नाशितं तमः अज्ञानं येषां ते । विष्णुभक्तेः प्रसादात्सर्वे प्राप्यत इति भावः ॥ ३२ ॥ अंकसमाप्तिं द्योतयति । इति निःक्रांताः सर्वे ॥ इति अंकसमाप्तौ सर्वेषां निष्क्रामणमित्यर्थः ॥ ॥ इति श्रीभट्टविनायकात्मजदीक्षितरामदासविरचिते प्रकाशाख्ये प्रबोधचन्द्रोदयनाटकाख्याने षष्टोंकः समाप्तः ॥ ६ ॥ छ ॥ छ ॥

References.— 1 Mss.— Aufrecht's Catalogus Catalogorum i, 353a ; ii, 79a, 211a ; iii, 75a.

Descriptive Catalogues—I. O. Cat. Pt. VII. Nos. 4139-42.

2 Printed Editions— Printed by R. S. Gondhalekar Poona, 1886.

प्रबोधचन्द्रोदय
with
प्रकाश

Prabodhacandrodaya
with
Prakāśa

No. 118

255.
1880-81.

Size.— 14 in. by $5\frac{2}{5}$ in.

Extent.— 70 leaves ; 3-5 lines to a page ; 40 letters to a line (text).
6-8 ,, ,, ,, ,, 55-60 ,, ,, ,, ,, (com.).

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing clear and legible but not uniform ; borders ruled in two double black lines ; red pigment used ; folios numbered in both margins ; text in the middle with the commentary above and below it ; yellow pigment used for corrections; folios 68, 69 and 70 have yellow appearance ; fol. 1 slightly torn ; some edges worn out ; complete.

Age.— Saṁvat 1753.

Author (of the text).— Kṛṣṇamiśra.

,, (,, ,, com.).— Rāmadāsa.

Begins—(text) fol. 1b

श्रीलक्ष्मीनृसिंहाय नमः

मध्याह्नार्कमरीचि etc. as in No. 111.

,, (com.) fol. 1b

श्रीगणेशाय नमः ॥

॥ रामं विनायकं वंदे etc. as in No. 117.

fol. 11b इति श्रीप्रबोधचन्द्रोदयव्याख्याने प्रकाशाख्ये प्रथमोंकः ॥

fol. 24b इति श्रीप्रबोधचंद्रोदयप्रकाशो द्वितीयोंकः समाप्तः छ

Ends.—(text) fol. 69b

उत्तिष्ट वत्स किं ते भूयः प्रियमुपकरोमि etc. up to संसाराब्धि विषयममतातंकपंकं तरंतु as in No. 111.

Ends.— (com.) fol. 69[b]

श्रीकृष्णमिश्राः ग्रंथांते etc. up to सर्वे प्राप्यत इति भावः ३३
as in No. 117.

followed by अंकसमाप्तिं द्योतयति ॥ इति निःक्रांताः सर्वे इति अंकसमाप्तौ सर्वेषां निष्क्रामणमित्यर्थः छ

इति श्रीमद्भट्टविनायकात्मजदीक्षितरामदासविरचिते प्रकाशाख्ये प्रबोधचन्द्रोदयनाटकव्याख्याने जीवन्मुक्तिनिरूपणं नाम षष्ठोंकः ६

सप्राकृतं etc....up to विबुधैर्न मूर्खै १ as in No. 120 below

followed by संवत् १७५३ ॥

References.-- Same as in No. 117.

प्रबोधचन्द्रोदय
with
प्रकाश

Prabodhacandrodaya
with
Prakāśa

No. **119**

78.
1883–84.

Size.— 13 in. by $6\frac{1}{2}$ in.

Extent.— 70 leaves ; 5-7 lines to a page ; 40 letters to a line (text).
6-9 ,, ,, ,, ,, 45 ,, ,, ,, ,, (com.).

Description.— Smooth country paper ; Devanāgarī characters ; hand-writing clear, legible and uniform ; red pigment used for certain words and colophons ; text in the middle with the commentary above and below it ; yellow pigment used for corrections ; folios numbered in both margins ; complete.

Age. — Not very old.

Author (of the text).— Kṛṣṇamiśra.

,, (,, ,, com.).— Rāmadāsa.

Begins—(text) fol. 1[b]

मध्याह्नार्कमरीचि etc. as in No. 111.

,, (com.) fol. 1[b]

ॐ श्रीगणेशाय नमः

रामं विनायकं वंदे etc. as in No. 117.

fol. 11[b] इति श्रीप्रबोधचन्द्रोदये व्याख्याने प्रकाशाख्ये प्रथमो अंकः १

fol. 24[b] इति प्रबोधचन्द्रोदयप्रकासे द्वितीयो अंकः संपूर्णम् ॥

Ends.—(text) fol. 69[b]

उत्तिष्ट वत्स किं ते भूयः प्रियमुपकरोमि etc. up to संसाराब्धि विषयममतातंकपंकं तरंतु as in No. 111.

followed by इति निष्क्रांताः सर्वे इति

Ends.—(com.) fol. 69[b]

श्रीकृष्णमिश्रः ग्रंथांते etc. up to सर्वं प्राप्यत इति भावः as in No. 117.

followed by अंकसमाप्ति द्योतयति इति इति निष्क्रांताः सर्वे इति अंकसमाप्तौ सर्वेषां निष्क्रामणीमित्यर्थः इति श्रीभट्टविनायकात्मजदीक्षितरामदास-विरचिते प्रकाशाख्ये प्रबोधचन्द्रोदयनाटके जीवन्मुक्तिनिरूपणं नाम षष्ठोंकः समाप्तः ६ ॥ समाप्तोयं नाटकं ॥

References.— Same as in No. 117.

प्रबोधचन्द्रोदय
with
प्रकाश

Prabodhacandrodaya
with
Prakāśa

No. 120

224.
Viśrāma (i).

Size.-- 14 in. by 7 in.

Extent.— 70 leaves ; 4-7 lines to a page ; 40 letters to a line (text).
8-10 ,, ,, ,, ,, 45 ,, ,, ,, ,, (com.).

